# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (सप्तम अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ अथ सप्तमोऽध्यायः ॥

। ध्यानम् ।

ॐ ध्यायेयं(म्) रत्नपीठे शुककलपठितं(म्) शृण्वतीं(म्) श्यामलाङ्गीं(न्),
न्यस्तैकां(ङ्)घ्रिं(म्) सरोजे शशिशकलधरां(वँ) वल्लकीं(वँ) वादयन्तीम् ।
कह्लाराबद्धमालां(न्) नियमितविलसच्चोलिकां(म्) रक्तवस्त्रां(म्),
मातङ्गी शङ्खपात्रां(म्) मधुरमधुमदां(ञ्) चित्रकोद्भासिभालाम् ॥

ॐ ऋषिरुवाच ॥ 1॥

आज्ञप्तास्ते ततो दैत्याश्- चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता, ययुरभ्युद्यतायुधाः ॥ 2॥

ददृशुस्ते ततो देवी- मीषद्धासां(वँ) व्यवस्थिताम् ।
सिं(म्)हस्योपरि शैलेन्द्र- शृङ्गे महति काञ्चने ॥ 3॥

ते दृष्ट्वा तां(म्) समादातु- मुद्यमं(ञ्) चक्रुरुद्यताः ।
आकृष्टचापासिधरास्- तथान्ये तत्समीपगाः ॥ 4॥

ततः(ख्) कोपं(ञ्) चकारोच्चै- रम्बिका तानरीन् प्रति ।
कोपेन चास्या वदनं(म्), मषीवर्णमभूत्तदा ॥ 5॥

भ्रुकुटीकुटिलात्तस्या, ललाटफलकाद्द्रुतम् ।
काली करालवदना, विनिष्क्रान्तासिपाशिनी ॥ 6॥

विचित्रखट्वाङ्गधरा, नरमालाविभूषणा ।
द्वीपिचर्मपरीधाना, शुष्कमां(म्)सातिभैरवा ॥ 7॥

अतिविस्तारवदना, जिह्वाललनभीषणा ।
निमग्नारक्तनयना, नादापूरितदिङ्मुखा ॥ 8॥

सा वेगेनाभिपतिता, घातयन्ती महासुरान् ।
सैन्ये तत्र सुरारीणा- मभक्षयत तद्बलम् ॥ 9॥

पार्ष्णिग्राहाङ्कुशग्राहि- योधघण्टासमन्वितान् ।
समादायैकहस्तेन , मुखे चिक्षेप वारणान् ॥ 10॥

तथैव योधं(न्) तुरगै , रथं(म्) सारथिना सह ।
निक्षिप्य वक्त्रे दशनैश्- चर्वयन्त्यतिभैरवम् ॥ 11॥

एकं(ञ्) जग्राह केशेषु, ग्रीवायामथ चापरम् ।
पादेनाक्रम्य चैवान्य- मुरसान्यमपोथयत् ॥ 12॥

तैर्मुक्तानि च शस्त्राणि, महास्त्राणि तथासुरैः ।
मुखेन जग्राह रुषा, दशनैर्मथितान्यपि ॥ 13॥

बलिनां(न्) तद् बलं(म्) सर्व- मसुराणां(न्) दुरात्मनाम् ।
ममर्दाभक्षयच्चान्या- नन्यां(म्)श्चाताडयत्तथा ॥ 14॥

असिना निहताः(ख्) केचित्- केचित्खट्वाङ्गताडिताः ।
जग्मुर्विनाशमसुरा, दन्ताग्राभिहतास्तथा ॥ 15॥

क्षणेन तद् बलं(म्) सर्व- मसुराणां(न्) निपातितम् ।
दृष्ट्वा चण्डोऽभिदुद्राव , तां(ङ्) कालीमतिभीषणाम् ॥ 16॥

शरवर्षैर्महाभीमैर्- भीमाक्षीं(न्) तां(म्) महासुरः ।
छादयामास चक्रैश्च, मुण्डः क्षिप्तैः(स्) सहस्रशः ॥ 17॥

तानि चक्राण्यनेकानि, विशमानानि तन्मुखम् ।
बभुर्यथार्कबिम्बानि , सुबहूनि घनोदरम् ॥ 18॥

ततो जहासातिरुषा, भीमं(म्) भैरवनादिनी ।
कालीकरालवक्त्रान्तर्- दुर्दर्शदशनोज्ज्वला ॥ 19॥

उत्थाय च महासिं(म्) हं(न्), देवी चण्डमधावत ।
गृहीत्वा चास्य केशेषु, शिरस्तेनासिनाच्छिनत् ॥ 20॥

अथ मुण्डोऽभ्यधावत्तां(न्) दृष्ट्वा चण्डं(न्) निपातितम् ।
तमप्यपातयद्भूमौ , सा खड्गाभिहतं(म्) रुषा ॥ 21॥

हतशेषं(न्) ततः(स्) सैन्यं(न्) , दृष्ट्वा चण्डं(न्) निपातितम् ।
मुण्डं(ञ्) च सुमहावीर्यं(न्), दिशो भेजे भयातुरम् ॥ 22॥

शिरश्चण्डस्य काली च, गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहास- मिश्रमभ्येत्य चण्डिकाम् ॥ 23॥

मया तवात्रोपहृतौ, चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं(म्) शुम्भं(न्), निशुम्भं(ञ्) च हनिष्यसि ॥ 24॥

ऋषिरुवाच ॥ 25॥

तावानीतौ ततो दृष्ट्वा, चण्डमुण्डौ महासुरौ ।
उवाच कालीं(ङ्) कल्याणी, ललितं(ञ्) चण्डिका वचः ॥ 26॥

यस्माच्चण्डं(ञ्) च मुण्डं(ञ्) च, गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके, ख्याता देवि भविष्यसि ॥ 27॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये

चण्डमुण्डवधो नाम सप्तमोऽध्यायः ॥

उवाच 2, श्लोकाः 25, एवम् 27,  एवमादितः 439॥

